निबन्धम - वैदिक वाङ्मय वायव्य-पर्यावरण-चेतना)

238

website : www.chintanresearchjournal.com

ISSN 2320 – 8325
Impact Factor : 3.006

International Refereed

# दर्शन

दर्शनशास्त्र, संस्कृत साहित्य एवं योग विषयों से सम्बन्धित
अन्तरराष्ट्रीय मूल्याँकित त्रैमासिक शोध-पत्रिका
विश्वविद्यालय अनुदान आयोग सूची क्रमाँक : 44517

वर्ष : 5 अंक : 17-18
जनवरी-जून 2017

संपादक

**आचार्य (डॉ॰) शीलक राम**

यावत् जीवेत् सुखं जीवेत्

# आचार्य अकादमी, भारत

**ISO 9001 : 2008**

(239)

# शोध-आलेखानुक्रम


- दिङ्नाग के कुन्दमाला नाटक में अद्भुत रस समीक्षण
  बाबूलाल मीना 10-18
- वैदिकवाङ्मये वायव्यपर्यावरणचेतना
  डॉ॰ आचार्यबृहस्पतिमिश्रः 19-25
- राजशेखर के बालरामायणम् नाटक में अद्भुत रस विवेचन
  डॉ॰ आशा सिंह 26-30
- गीता के ज्ञानमार्ग का एक विश्लेषण
  सन्तोष कुमार 31-38
- अशुभ की समस्या का दार्शनिक अध्ययन
  सोनिया रानी 39-44
- प्रेमचन्द के साहित्य में उपस्थित राजनीतिक दर्शन विविध आयाम
  अरुणा 45-50
- गांधी-दर्शन में मानवीय मूल्यों के एकादश आधार (एक सैद्धान्तिक अध्ययन)
  तेजराम पाल 51-58
- **Aurobindo's Philosophy and The Concept of Human Unity**
  Dr. Surender Kumar 59-67
- **Philosophy of Non-Violence of Gandhi**
  Rajesh Chahal 68-70
- **A Journey to the Land of Legendary Masters**
  Prof. Ravi Sharma, Afshana Shafi 71-76
- प्रमुख वेदान्त दर्शनों में "तत्त्वमसि"-एक व्याख्या
  डॉ.ममता भाटी 77-83
- रामायण में नैतिक मूल्यों की अवधारणा
  डॉ॰ जय सिंह 84-86
- जैन धर्म/दर्शन में ध्यान का स्वरूप
  डॉ॰ पुनीत कुमार मिश्र 87-93
- योगवसिष्ठरामायण के सन्दर्भ में बन्धन और मोक्ष
  डॉ॰ विशम्बर दास 94-98
- काश्मीर शैवदर्शन के प्रमुख सिद्धान्त
  शील कुमार 99-102
- व्याकरणशास्त्रे महर्षिपाणिनेः कालविषयकं चिन्तनम्
  प्रतिभा आर्या 103-107
- वर्तमान शिक्षा व्यवस्था में मूल्यपरकता की आवश्यकता
  प्रियंका आर्या 108-111
- वेदों में चिकित्सा विज्ञान (विशेषतः जलीयचिकित्सा के सन्दर्भ में)
  प्रतिभा आर्या 112-115

International Refereed

दर्शन अन्तरराष्ट्रीय मूल्यांकित त्रैमासिक शोध-पत्रिका

वर्ष:5, अंक:17-18, (पृ.सं. 19-25) (ISSN : 2320–8325)

# वैदिकवाङ्मये वायव्यपर्यावरणचेतना

डॉ॰ आचार्यबृहस्पतिमिश्रः

प्राध्यापकः

श्रीशक्ति-संस्कृत-महाविद्यालयः

श्रीनयनादेवी जी, बिलासपुरम् (हि॰ प्र॰)

**शोध-आलेख सार**

**वेदानां स्वस्य भाषा-शैली च वर्तते । वेदाः कानिचिदपि तत्त्वानि मनुष्योपयोगीनि मन्यन्ते तथा च इच्छन्ति यत् एतं विषयं यदि जनाः यथार्थरूपेण जानन्तु तर्हि तस्य विषयस्य महत्त्वं वेदाः प्रतिपादयिष्यन्ति अथवा तस्य वस्तुनः प्रार्थनां करिष्यन्ति यत् अस्मभ्यम् एतां शक्तिं ददातु इति । सामान्यतः सिद्धान्तः वर्तते यत् यस्मिन् यत् सामर्थ्यम् अस्ति सः तदेव कार्यं कर्तुं शक्नोति ।**

**नासतो विद्यतो भावो नाभावो विद्यते सतः ।**

**तथा च तस्मात् तस्यैव प्रार्थना अपेक्षा च क्रियते यत् वस्तु तस्य पार्श्वेऽस्ति । यदि सामर्थ्यं नास्ति तर्हि प्रार्थना व्यर्था अस्ति । यतो हि वेदाः अपौरुषेयाः सन्ति ।अतः तेषु कदापि असत्यस्य प्रार्थना याचना च भवितुम् एव नार्हति । ऋग्वेदे वायुद्वारा हृदयस्य कृते कल्याणकारिकायाः, आनन्ददायिकायाः, आयुवर्द्धिकायाः शक्तेः कामना कृता वर्तते ।**

**मुख्य-शब्द : तुभ्यं वातः पवतां मातरिश्वा, मयोभूर्वातो अभि वात, विद्याविहीनः पशुः ।**

आस्तिकविदुषां मते वेदाः सार्वभौमिकाः सार्वकालिकाश्च सन्ति, अतः एव लोकोन्मुखिमानवैः उत्पादितायाः जीवनमूलोन्मूलनकारि-प्रदूषणसमस्यायाः समाधानम् अपि वेदेषु एवं च ये वेदान् प्रमाणं मन्यन्ते, ता–शेषु आस्तिकग्रन्थेषु तथा च ऋषिवचनेष्वपि वर्तते । यदा आरभ्य सृष्टिः भौतिकरूपेषु परिवर्तिता, तदारभ्य नैरन्तर्येण एकस्य वस्तुनः नाशः तथा च तस्य स्थाने नूतनवस्तुनः उत्पन्नम् इति निर्विघ्नतया इदानीं यावत् प्रचलन् अस्ति ।

एतेषु प्राकृतिकक्रमेषु कालानुक्रमेण विनाशयुक्तानि वस्तूनि पृथिव्याः कारणात् जैविकोपचयापचयक्रमेण विघटितानि भवन्ति पञ्चसु तत्त्वेषु च विलीयन्ते । अस्यां प्रक्रियायां जीवाणवः विभिन्नानां वातीनां निर्माणपुरस्सरम् उत्सर्जनं कुर्वन्ति, तैः उत्सृष्टावातिः अत्यन्तं दुर्गन्धयुक्ता भवति ।अतः प्रदूषणं विस्तारयति, किन्तु प्राकृतिकक्रमेषु एतत् प्रदूषणं निसर्गसिद्धसन्तुलनचक्रस्य अंशः वर्तते ।यदि वयं गभीरतया चिन्तयामः तर्हि एतत् प्रदूषणं नास्ति अपि तु सृष्टिप्रक्रियायाः विशेषाङ्गः वर्तते । एतेन प्राकृतिकप्रक्रियायां समानं सन्तुलनं जायते ।

वस्तुतस्तु सृष्टौ किमपि तत्त्वं प्राकृतिकप्रक्रियायां समस्यां न जनयति । किन्तु कदाचित् तत्तत्त्वस्य प्राकृतिकस्थानेषु न्यूनता अथवा अधिकता भवति तर्हि सृष्टिप्रक्रियायाम् असन्तुलनम् उत्पद्यते ।अस्य एव 'प्रदूषणम्'इति नाम अस्ति एतदेव च समस्यारूपेण आयाति। उदाहरणार्थ वनेषु बहवः वृक्षाः भवन्ति, केषुचित् वृक्षेषु बहूनि फलानि उत्पद्यन्ते । किन्तु किंचित् कालानन्तरं फलानि पक्वानि भूत्वा भूमौ पतन्ति । कानिचित् फलानि पशुपक्षिणः खादन्ति कानिचिच्च भूमौ एव गलितानि भवन्ति। अथ च कानिचिद् फलानि प्राकृतिकक्रमेषु आतपवायुकारणात् द्वित्रिदिनेषु गलित्वा समाप्यन्ते । किन्तु तेषां फलद्वारा वृक्षेषु नूतना उर्जा उत्पद्यते । किन्तु शाकादिविक्रयणस्थानेषु गलितानि फलानि एकस्मिन् कोणे स्थापयन्ति । तत्र सम्यक्तया आतपवायोः प्रभावः न भवति । अतः तानि यदा